**अङ्गाधीश** पु० ६त० । अङ्गदेशाधिपे कर्णे लग्नाधिपे च "अङ्गाधीशः खगेहे बुधगुरुकविभिः संयुत" इति जातकम् । अङ्गाधीश्वरादयोऽप्यत्र ।

**अङ्गार** अस्त्री० अङ्ग—आरन् । अर्द्धदग्धे—अग्निसंक्रान्ते अग्निशून्ये वा (आङार) इति प्रसिद्धे काष्ठखण्डे । "घृत-कुम्भसमा नारी तप्ताङ्गारसमः पुमानिति" "ज्वलदङ्गार-सन्निभमिति" "अङ्गारे शतधौतेऽपि मालिन्यं नैव गच्छतीति" । "उष्णो दहति चाङ्गारः शीतः कृष्णायते करमिति" च पुरा० । "असौ वावादित्योऽग्निर्दिशो-ऽङ्गाराः" इति छा०ब्रा० । "व्यङ्गारे भुक्तवज्जने" इति स्मृतिः । "अङ्गिरा अङ्गार" इति यजु० । "येऽस्याङ्गारा आसंस्तेऽङ्गिरसोऽभवन्निति" ऐत० ब्रा० । भौमग्रहे पु० रक्तवर्णे न०तद्वति त्रि० । पाशा०यत् अङ्गार्य्या स्त्री तत्सङ्घे ।

**अङ्गारक** अस्त्री अङ्गार+स्वार्थे कन् । अङ्गारे "अङ्गारकस्त्वव-न्त्याञ्चेति" पुरा० । "अष्टावङ्गारके तथेति" ज्योतिषम् । "अङ्गारके कुमारञ्च बुधे नारायणं तथेति" पुरा० । अस्य चारो यथा

"यद्युदयर्क्षाद्वक्रं करोति नवमाष्टमसप्तमर्क्षेषु । तद्वक्रमुष्ण-मुदये पीडाकरमग्निवार्त्तानाम् ॥ द्वादशदशमैकादशनक्ष-त्राद्वक्रितः कुजोऽश्रुमुखम् । दूषयति रसानुदये करोति रोगानवृष्टिं च ॥ व्यालं त्रयोदशर्क्षाच्चतुर्दशाद्वा विपच्यते ऽस्तमये । दंष्ट्रिव्यालमृगेभ्यः करोति पीडां सुभिक्षं च ॥ रुधिराननमिति वक्रं पञ्चदशात् षोड़शाच्च विनिवृत्ते तत्कालं मुखरोगं सभयं च सुभिक्षमावहति ॥ असिमुशलं सप्तदशादष्टादशतोऽपि वा तदनु वक्रे । दस्युगणेभ्यः पीडां करोत्यवृष्टिं सशस्त्रभयम् ॥ भाग्यार्यमोदितो यदि निवर्त्तते वैश्वदैवते भौमः । प्राजापत्येऽस्तमितस्त्रीनपि लोकान्निपीड़यति ॥ श्रवणोदितस्य वक्रं पुष्ये मूर्धाभि-षिक्तपीडाकृत् । यस्मिन्नृक्षेऽभ्युदितस्तद्दिग्व्यूहान् जनान् हन्ति ॥ मध्येन यदि मघानां गतागतं लोहितः करोति ततः । पाण्ड्यो नृपो विनश्यति शस्त्रोद्योगाद्भयमवृष्टिः ॥ भित्त्वा मघां विशाखां भिन्दन् भौमः करोति दुर्भिक्षम् । मरकं करोति घोरं यदि भित्त्वा रोहिणीं याति ॥ दक्षिणतो रोहिण्याश्चरन् महीजोऽर्घवृष्टिनिग्रहकृत् । धूमायन् सशिखो वा विनिहन्यात् पारियात्रस्थान् ॥ प्राजापत्ये श्रवणे मूले तिसृषूत्तरासु शाक्रे च । विचरन् घननिवहानामुपघातकरः क्षमातनयः ॥ चारोदयाः प्रशस्ताः श्रवणमघादित्यमूलहस्तेषु । एकपदाश्विविशाखा-प्राजापत्येषु च कुजस्य ॥ विपुलविमलमूर्त्तिः किंशुकाशोक वर्णः स्फुटरुचिरमयूखस्तप्तताम्रप्रभाभः । विचरति यदि मार्गं चोत्तरं मेदिनीजः शुभकृदवनिपानां हार्द्दिदश्च प्रजानाम् ॥" इति बृहत्संहिता ।

तस्य भक्तिदेशादि ग्रहभक्त्यध्याये तत्रैवोक्तं यथा

"शोणस्य नर्मदाया भीमरथायाश्च पश्चिमार्धस्थाः । निर्विन्ध्या वेत्रवती सिप्रा गोदावरी वेणा ॥ मन्दा-किनी पयोष्णी महानदी सिन्धुमालतीपाराः । उत्तर पाण्ड्यमहेन्द्राद्रिविन्ध्यमलयोपगाश्चोलाः ॥ द्रविडविदेहा न्ध्राश्मकभासापुरकौङ्कणाः समन्त्रिशकाः । कुन्तलकेरल-दण्डककान्तिपुरम्लेच्छसङ्करजाः ॥ नासिक्यभोगवर्धन-विराटविन्ध्याद्रिपार्श्वगा देशाः । ये च पिबन्ति सुतोयां तापीं ये चापि गोमतीसलिलम् ॥ नागरकृषिकरपारत-हुताशनाजीविशस्त्रवार्त्तानाम् । आटविकदुर्गकर्वटबधक-नृशंसावलिप्तानाम् ॥ नरपतिकुमारकुञ्जरदाम्भिकडिम्भा-भिघातपशुपानाम् । रक्तफलकुसुमविद्रुमचमूपगुडमद्य-तीक्ष्णानाम् ॥ कोशभवनाग्निहोत्रिकधात्वाकरशाक्यभिक्षु-चौराणाम् । शठदीर्घवैरबह्वाशिनां च वसुधासुतोऽधिपतिः" इति । अङ्गारमिव इवार्थे कन् । रक्तवर्णत्वात् कुरण्टकवृक्षे, (भीमराज) इति ख्याते-भृङ्गराजवृक्षे च पु० । अल्पार्थे कन् । विस्फुलिङ्ग इति विख्याते—अङ्गारक्षुद्रांशे न० । "दूर्वा लाक्षा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी । बृहती सैन्धवं कुष्ठं रास्ना मांसी शतावरी । आरनालाढकेनैव तैलप्रस्थं विपाचयेत् । तैलमङ्गारकं नाम सर्वज्वरविनाशनमिति" चक्रदत्तवैद्यकोक्ते तैलभेदे न० । [विक्रयार्थमङ्गारकारके ।

**अङ्गारकारिन्** त्रि० अङ्गारं करोति कृ—णिनि । काष्ठं दग्ध्वा

**अङ्गारकमणि** पु० अङ्गारकस्य प्रियः मणिः । प्रवाले तस्य च रक्तवर्णत्वात् तत्प्रियत्वं "माणिक्यं भास्करे देयं चन्द्रे मुक्तां प्रदापयेत् प्रवालञ्च कुजे दद्या"दित्यादिना तत्कृताशुभप्रतीकाराय प्रवालदानोक्तेः तत्प्रियत्वम् ।

**अङ्गारकुष्ठक** पु० अङ्गारवर्णं कुष्ठमिव कन् । हिताबलीनाम-कौषधिभेदे ।

**अङ्गारधानी** स्त्री अङ्गाराणि धीयन्तेऽस्याम् धा—आधारे ल्युट् ङीप् । (आङ्ठा) इति ख्याते अङ्गाराधान-पात्राम् स्वार्थे कन् । अङ्गारधानिकाप्यत्रैव ।

**अङ्गारपरिपाचित** न० अङ्गारेण (ज्वलदग्निव्याप्तकाष्ठखण्डेन) परिपाच्यते परि+पच-स्वार्थे णिच्—क्त ३त० । (कवाब) इति प्रसिद्धे-पक्वमांसादौ ।